[The object of Sanjaya in using these names is to remind Dhritarāshtra—who may naturally be a little elated at the prospect of Arjuna's not fighting —that this is only a temporary weakness, since by the presence of the Lord of the senses all ignorance must eventually be dispelled. Arjuna's own nature also is devoid of darkness. Is he not the conqueror of sleep, and the terror of foes?]

तमुवाच हृषीकेशः प्रहसन्निव भारत ।।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ।।१०।।

भारत Descendant of King Bharata (after whom India is called Bhārata-Varsha) Bhārata (Dhritarāshtra) हृषीकेशः Hrishikesha प्रहसन् smiling इव as if उभयोः of the two सेनयोः armies मध्ये in the midst विषीदन्तम् sorrowing तम् to him इदं this वचः word उवाच spoke.

10. To him who was sorrowing in the midst of the two armies, Hrishikesha, as if smiling, O descendant of Bharata, spoke these words.

[*Smiling*—to drown Arjuna in the ocean of shame. Krishna's smile at Arjuna's sorrow is like the lightning that plays over the black monsoon cloud. The rain bursts forth, and the thirsty earth is saturated. It is the smile of the coming illumination.]

श्रीभगवानुवाच ।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ।।११।।

श्रीभगवान् The Blessed Lord उवाच said:

त्वं Thou अशोच्यान् those who should not be mourned for अन्वशोचः hast been mourning प्रज्ञावादान् words of wisdom भाषसे thou speakest च but पण्डिताः the wise गतासून् the dead अगतासून् the living च and न अनुशोचन्ति grieve not.

The Blessed Lord said:

11. Thou hast been mourning for them who should not be mourned for. Yet thou speakest words of wisdom. The (truly) wise grieve neither for the living nor for the dead.

[*Words of wisdom:* Vide I. 35-44.]

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।।
न चैव न भविष्यामः सर्वे वयमतः परम्
।।१२।।

अहं I जातु ever न तु आसं did not exist (इति) न एव not indeed त्वं thou (न आसीः did not exist) न not इमे these जनाधिपाः kings (न आसन् did not exist) न not अतःपरम् hereafter सर्वे all वयम we न not भविष्यामः shall exist च also न एव not at all.

12. It is not that I have never existed, nor thou, nor these kings. Nor is it that we shall cease to exist in the future.

[Of course Krishna here does not mean that the body is immortal, but refers to the true Self, behind all bodies.]

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ।।१३।।

यथा As देहिनः of the embodied (soul) अस्मिन् देहे in this body कौमारं childhood यौवनं youth जरा old age तथा so also देहान्तरप्राप्तिः the attaining of another body तत्र thereat धीरः the calm soul न मुह्यति is not deluded.

13. As are childhood, youth, and old age, in this body, to the embodied soul, so

also is the attaining of another body. Calm souls are not deluded thereat.

[According to this, the continuity of the ego is no more interrupted by death than by the passing of childhood into youth and youth into old age in this body.

Calm souls: Those who have become calm by Self-realisation.]

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत
।।१४।।

कौन्तेय O son of Kunti मात्रास्पर्शाः contacts of senses with their objects तु indeed शीतोष्णसुखदुःखदाः producers of (the notions of) cold and heat, pleasure and pain आगमापायिनः with beginning and end अनित्याः impermanent भारत O Bhārata तान् them तितिक्षस्व bear with.

14. Notions of heat and cold, of pain and pleasure, are born, O son of Kunti, only of the contact of the senses with their objects. They have a beginning and an end. They are impermanent in their nature. Bear them patiently, O descendant of Bharata.

[*They have a beginning and an end:* as distinguished from the permanent Self. The more one is able to identify oneself with the permanent

Self, the less one is affected by the agreeable and disagreeable conditions of life.

Impermanent in their nature: That is, the same object which gives pleasure at one moment, gives pain at another, and so on.]

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ।।१५।।

पुरुषर्षभ O Bull (i.e. chief) among men एते these समदुःखसुखं same in pain and pleasure धीरं calm यं that पुरुषं (lit. dweller in the body) man न व्यथयन्ति afflict not सः he हि surely अमृतत्वाय for immortality कल्पते is fit.

15. That calm man who is the same in pain and pleasure, whom these cannot disturb, alone is able, O great amongst men, to attain to immortality.

(This perfect sameness, amidst the ills of life, means full and unbroken consciousness of our oneness with the immortal Self. Thus is immortality attained.)

नासतो विद्यते भावो नाभावो विद्यते सतः ।।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।।१६।।

असतः Of the unreal भावः existence न विद्यते is not सतः of the real अपि also अभावः non-existence न विद्यते is

not तत्त्वदर्शिभिः by the knowers of the Truth तु indeed अनयोः उभयोः of these two अन्तः the final truth दृष्टः seen.

16. The unreal never is. The Real never is not. Men possessed of the knowledge of the Truth fully know both these.

[*Unreal and Real:* The determination of the nature of the Real is the quest of all philosophy. Shri Krishna here states that a thing which never remains the same for any given period is unreal, and that the Real on the other hand is always the same. The whole of the phenomenal world, therefore, must be unreal, because in it no one state endures for even an infinitesimal division of time. And that which takes note of this incessant change, and is therefore itself changeless—the Ātman, Consciousness—is the Real.]

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ।।१७।।

येन By which इदं this सर्वम् all ततम् is pervaded तत् That अविनाशि indestructible तु विद्धि know for certain कश्चित् one अस्य अव्ययस्य of this Immutable विनाशम् destruction कर्तुम् to do न अर्हति is not able.

17. That by which all this is pervaded—That know for certain to be indestructible. None has the power to destroy this Immutable.

[*That by which all this is pervaded:* i.e. He that pervades all this *as the Witness.*]

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ।।१८।।

नित्यस्य Of the ever-changeless अनाशिनः of the indestructible अप्रमेयस्य of the illimitable शरीरिणः of the Indweller इमे these देहाः bodies अन्तवन्तः having an end उक्ताः are said भारत O Bhārata तस्मात् therefore युध्यस्व fight.

18. Of this indwelling Self—the ever-changeless, the indestructible, the illimitable—these bodies are said to have an end. Fight, therefore, O descendant of Bharata.

[Arjuna's grief which deters him from his duty of fighting against the Kauravas is born of ignorance as to the true nature of the soul. Hence Shri Bhagavān's strong and repeated attempts to illumine him on the subject.]

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ।।१९।।

यः Who एनं this (Self) हन्तारं slayer वेत्ति knows यः च and who एनं this हतम् slain मन्यते thinks उभौ both तौ these न not विजानीतः know अयं this (Self) न not हन्ति slays न not हन्यते is slain.

19. He who takes the Self to be the slayer, and he who takes It to be the slain, neither of these knows. It does not slay, nor is It slain.

[Cf. Katha Up. I. ii. 19-20]

न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ।।२०।।

अयं this (Self) कदाचित् ever न not जायते is born वा or म्रियते dies वा or न भूत्वा not having been भूयः again भविता comes into being (इति) न (it is) not. (Another paraphrase) वा Or भूत्वा having been भूयः again न भविता ceases to be (इति) न (it is) not. अजः unborn नित्यः eternal शाश्वतः changeless पुराणः ever Itself अयं this (Self) शरीरे the body हन्यमाने being killed न not हन्यते is killed.

20. This is never born, nor does It die. It is not that, not having been, It again comes into being. (Or according to another view: It is not that having been, It again ceases to be). This is unborn, eternal, changeless, ever-Itself. It is not killed when the body is killed.

[This shloka refers in the sense of denial to the six kinds of modification inherent in matter: birth, subsistence, growth, transformation, decay, and death.]

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ।।२१।।

पार्थ O Pārtha यः who एनम् this (Self) अविनाशिनं indestructible नित्यं changeless अजम् unborn अव्ययम् immutable वेद knows सः that पुरुषः person कथं how कं whom हन्ति kills कं whom घातयति causes to slay.

21. He that knows This to be indestructible, changeless, without birth, and immutable, how is he, O son of Pṛithā, to slay or cause another to slay?

[*How is he to slay*?—referring to Arjuna. To *cause another to slay*—referring to Krishna's own part.]

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ।।२२।।

नरः A man यथा as जीर्णानि worn-out वासांसि clothes विहाय casting off अपराणि others नवानि new गृह्णाति takes

तथा so देही the embodied जीर्णानि worn-out शरीराणि bodies विहाय casting off अन्यानि others नवानि new संयाति enters.

22. Even as a man casts off worn-out clothes, and puts on others which are new, so the embodied casts off worn-out bodies, and enters into others which are new.

[As one only puts off the old, when one already possesses the new garment, so the embodied is already entering a new body in the act of leaving this. The Upanishad compares this to the movement of a leech, which has already established a new foothold before leaving the old.]

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ।।२३।।

शस्त्राणि Weapons एनं this (Self) न छिन्दन्ति cut not पावकः fire एनं This न दहति burns not आपः waters एनं This न क्लेदयन्ति wet not च and मारुतः wind न शोषयति dries not.

23. This (Self), weapons cut not; This, fire burns not; This, water wets not; and This, wind dries not.

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।।
नित्यः सर्वगतः स्थाणु चलोऽयं सनातनः ।।२४।।

अयम् This (Self) अच्छेद्यः cannot be cut अयम् This अदाह्यः cannot be burnt अक्लेद्यः cannot be wetted अशोष्यः च एव and cannot also be dried अयं This नित्यः changeless सर्वगतः all-pervading स्थाणुः unmoving अचलः immovable सनातनः eternal.

24. This Self cannot be cut, nor burnt, nor wetted, nor dried. Changeless, all-pervading, unmoving, immovable, the Self is eternal.

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ।।२५।।

अयम् This (Self) अव्यक्तः unmanifested अयम् This अचिन्त्यः unthinkable अयम् This अविकार्यः unchangeable उच्यते is said तस्मात् therefore एवं thus एनं This विदित्वा knowing अनुशोचितुम् to mourn न अर्हसि oughtest not.

25. This (Self) is said to be unmanifested, unthinkable, and unchangeable. Therefore, knowing This to be such, thou oughtest not to mourn.

[This Self is infinite and partless, so can be neither subject nor object of any action.]

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ।।२६।।

अथ च But if एनं This (Self) नित्यजातं constantly born नित्यं constantly वा or मृतम् dead मन्यसे thinkest तथापि even then महाबाहो mighty-armed त्वं thou एनं This शोचितुम् to mourn न अर्हसि oughtest not.

26. But if thou shouldst take This to have constant birth and death, even in that case, O mighty-armed, thou oughtest not to mourn for This.

[Krishna here, for the sake of argument, takes up the materialistic supposition, and shows that even if the Self were impermanent, sorrow ought to be destroyed, since in that case there would be no hereafter, no sin, and no hell.]

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ।।२७।।

हि For जातस्य of that which is born मृत्युः death ध्रुवः certain मृतस्य च and of that which is dead जन्म birth ध्रुवं certain तस्मात् therefore अपरिहार्ये अर्थे in an unavoidable matter त्वं thou शोचितुम् to grieve न अर्हसि oughtest not.

27. Of that which is born, death is certain; of that which is dead, birth is certain. Over the unavoidable, therefore, thou oughtest not to grieve.

[This shloka concerns only those who are not yet free. So long as there is desire, birth and death are inevitable.

Therefore thou oughtest not to grieve: Since you cannot control the inevitable and preserve the bodies of your relations, work out your own Karma and go beyond both birth and death.]

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।।
अव्यक्तनिधनान्येव तत्र का परिदेवना ।।२८।।

भारत O Bhārata भूतानि beings अव्यक्तादीनि unmanifested in the beginning व्यक्तमध्यानि manifested in the middle state अव्यक्तनिधनानि एव unmanifested again in the end तत्र there का what परिदेवना grief.

28. All beings are unmanifested in their beginning, O Bhārata, manifested in their middle state, and unmanifested again in their end. What is there then to grieve about?

[*Beings:* In their relationships as sons and friends, who are mere combinations of material elements, correlated as causes and effects.

The idea here is that which has no existence in the beginning and in the end, must be merely illusory in the interim, and should not therefore be allowed to have any influence upon the mind.]

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः ।।
आश्चर्य-[illegible]: शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ।।२९।।

कश्चित् Some one एनम् This (Self) आश्चर्यवत् as a wonder पश्यति looks upon तथा एव च and so also अन्यः another आश्चर्यवत् as a wonder वदति speaks अन्यः च another again एनम् This आश्चर्यवत् as a wonder शृणोति hears कश्चित् च and yet another श्रुत्वा अपि though hearing एनं This न एव वेद knows not at all.

29. Some look upon the Self as marvellous. Others speak of It as wonderful. Others again hear of It as a wonder. And still others, though hearing, do not understand It at all.

[The shloka may also be interpreted in the sense that those who see, hear, and speak of the Self are wonderful men, because their number is so small. It is not therefore remarkable that you should mourn, because the Ātman is so difficult to comprehend.]

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि
।।३०।।

भारत O Bhārata अयं this देही Indweller सर्वस्य of all देहे in the body नित्यम् ever अवध्यः indestructible तस्मात्

therefore त्वं thou सर्वाणि all भूतानि beings शोचितुम् to mourn न अर्हसि oughtest not.

30. This, the Indweller in the bodies of all, is ever indestructible, O descendant of Bharata. Therefore thou oughtest not to mourn for any creature.

[Krishna here returns to His own point of view.]

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते
।।३१।।

स्वधर्मम् Own Dharma अपि च and also अवेक्ष्य looking at न not विकम्पितुम् to waver अर्हसि oughtest हि for धर्म्यात् युद्धात् than a righteous war क्षत्रियस्य for a Kshatriya अन्यत् any other श्रेयः higher न विद्यते exists not.

31. Looking at thine own Dharma, also, thou oughtest not to waver, for there is nothing higher for a Kshatriya than a righteous war.

[That is to say, it is the duty of a Kshatriya to fight in the interest of his country, people, and religion.]

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ।।३२।।

पार्थ O Pārtha यदृच्छया of itself उपपन्नं come अपावृतम् opened स्वर्गद्वारम् the gate of heaven ईदृशम् such युद्धम्

battle सुखिनः happy क्षत्रियाः Kshatriyas च verily लभन्ते gain.

32. Fortunate certainly are the Kshatriyas, O son of Pritha, who are called to fight in such a battle that comes unsought as an open gate to heaven.

[The Shastras say that if a Kshatriya, fighting for a righteous cause, falls in the battle-field, he at once goes to heaven.]

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि
।।३३।।

अथ चेत् But if त्वम् thou इमं this धर्म्यं righteous संग्रामं warfare न करिष्यसि wouldst not do ततः then स्वधर्मं own Dharma कीर्तिं च and honour हित्वा forfeiting पापम् sin अवाप्स्यसि shalt incur.

33. But if thou refusest to engage in this righteous warfare, then forfeiting thine own Dharma and honour, thou shalt incur sin.

अकीर्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।।
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ।।३४।।

अपि च And also भूतानि beings ते of thee अव्ययाम् everlasting अकीर्तिम् dishonour कथयिष्यन्ति will tell संभावितस्य of the honoured अकीर्तिः dishonour मरणात् than death च surely अतिरिच्यते exceeds.

34. The world also will ever hold thee in reprobation. To the honoured, disrepute is surely worse than death.

[The present argument—shlokas 33–36—assumes that the cause in hand is already proved to be right. Hence it could only be from cowardice that Arjuna could abandon it. Even a hero may be weakened by the stirring of his deepest emotions.]

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्
।।३५।।

महारथाः च And the great chariot-warriors त्वां thee भयात् from fear रणात् from battle उपरतं withdrawn मंस्यन्ते will regard येषां of those त्वं thou बहुमतः much-thought-of भूत्वा having been लाघवम् lightness यास्यसि wilt receive.

35. The great chariot-warriors[1] will believe that thou hast withdrawn from the battle through fear. And thou wilt be lightly esteemed by them who have thought much of thee.

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्
।।३६।।

[1] *Vide* commentary 1.6.

तव Thine अहिता: च enemies also तव thy सामर्थ्यं prowess निन्दन्त: cavilling बहून् many अवाच्यवादान् unutterable things वदिष्यन्ति will say तत: than this दु:खतरं more painful नु किम् what (could be).

36. Thine enemies also, cavilling at thy great prowess, will say of thee things that are not to be uttered. What could be more intolerable than this?

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चय: ।।३७।।

हत: Slain वा or स्वर्गं heaven प्राप्स्यसि shalt gain जित्वा conquering वा or महिम् earth भोक्ष्यसे shalt enjoy तस्मात् therefore कौन्तेय O son of Kunti युद्धाय for fight कृतनिश्चय: resolved उत्तिष्ठ arise.

37. Dying thou gainest heaven; conquering thou enjoyest the earth. Therefore, O son of Kunti, arise, resolved to fight.

सुखदु:खे समे कृत्वा लाभालाभौ जयाजयौ ।।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ।।३८।।

सुखदु:खे Pain and pleasure समे the same कृत्वा having made लाभालाभौ gain and loss जयाजयौ conquest and defeat तत: then युद्धाय for battle युज्यस्व be ready एवं thus पापम् sin न no अवाप्स्यसि shalt incur.

38. Having made pain and pleasure, gain and loss, conquest and defeat, the same, engage thou then in battle. So shalt thou incur no sin.

[It is always the desire for one of the pairs of opposites that binds. When an act is done without attachment either for itself or its fruit, then Karma can be worked out without adding to its store, and this leads to Freedom.]

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।।
बुद्धया युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि।।३९।।

सांख्ये In regard to Self-realisation एषा this बुद्धि: wisdom ते to thee अभिहिता declared योगे तु but in regard to Yoga इमां it शृणु hear पार्थ O Partha यया with which बुद्धया wisdom युक्त: endued कर्मबन्धं bondage of Karma प्रहास्यसि shalt break through.

39. The wisdom of Self-realisation has been declared unto thee. Hearken thou now to the wisdom of Yoga, endued with which, O son of Prithā, thou shalt break through the bonds of Karma.

[*Yoga:* Karma-Yoga, or that plan of conduct which secures the working out of past Karma, non-accumulation of new, and the striving for Self-realisation with the whole of the will. In this discipline, one's sole object in life is Self-realisation; hence no importance is attached to anything else. Thus all actions are performed without attachment,

or care for results. So no new Karma is made: only the already accumulated is exhausted. And at the same time, the whole will is left free to devote itself to the achievement of Self-realisation alone.

In the preceding shlokas, 11–25, Krishna has given the point of view of the highest knowledge, the ancient Brahmajnāna. In the 26th and 27th we have a purely materialistic standpoint. Shlokas 28 to 37 give the attitude of a man of the world. In the 38th we have an anticipation of the Yoga. And in what is to follow, we have Shri Krishna's own contribution to the philosophy of life.]

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ।।४०।।

इह In this अभिक्रमनाशः waste of attempt न अस्ति is not प्रत्यवायः (च and) production of contrary results न विद्यते exists not अस्य धर्मस्य of this Dharma स्वल्पं very little अपि even महतः भयात् from great terror त्रायते protects.

40. In this, there is no waste of the unfinished attempt, nor is there production of contrary results. Even very little of this Dharma protects from the great terror.

[*Waste of the unfinished attempt:* A religious rite or ceremony performed for a definite object, if left uncompleted, is wasted, like a house unroofed which is neither serviceable nor enduring. In Karma-Yoga, however, that is, action and worship performed

without desire, this law does not apply, for every effort results in immediate purification of the heart. *Production of contrary results:* In worship for an object, any imperfection in the process produces positive loss instead of gain. As in cases of sickness, the non-use of the right medicine results in death. *The great terror:* Being caught in the wheel of birth and death.]

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्
।।४१।।

कुरुनन्दन O scion of Kuru इह in this व्यवसायात्मिका one-pointed बुद्धिः determination एका single (एव only) अव्यवसायिनाम् of the undecided बुद्धयः purposes हि indeed बहुशाखाः many-branching च and अनन्ताः innumerable.

41. In this, O scion of Kuru, there is but a single one-pointed determination. The purposes of the undecided are innumerable and many-branching.

[In Karma-Yoga, the one goal is Self-realisation. *The undecided* (that is, about the highest), naturally devote themselves to lower ideals, no one of which can satisfy. Thus they pass from plan to plan.]

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।।
वेदवादरताः पार्थ नान्यदस्तीतिवादिनः ।।४२।।
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ।।४३।।

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते
।।४४।।

पार्थ O Pārtha अविपश्चितः the unwise वेदवादरताः taking pleasure in the panegyric statements of the Vedas अन्यत् anything else न अस्ति does not exist इति this वादिनः declaring कामात्मानः full of desires स्वर्गपराः with heaven as their highest goal याम् which इमां this (well-known) पुष्पितां flowery जन्मकर्मफलप्रदाम् leading to (new) birth as the result of their works भोगैश्वर्यगतिं प्रति for the attainment of pleasure and power क्रियाविशेषबहुलां exuberant with various specific actions वाचं word प्रवदन्ति expatiate upon भोगैश्वर्यप्रसक्तानां of (people) deeply attached to pleasure and power तया by that अपहृतचेतसाम् with their discrimination stolen away व्यवसायात्मिका set बुद्धिः determination समाधौ in the mind न विधीयते is not formed.

42-44. O Pārtha, no set determination is formed in the minds of those that are deeply attached to pleasure and power, and whose discrimination is stolen away by the flowery words of the unwise, who are full of desires and look upon heaven as their highest goal and who, taking pleasure in the panegyric words of the Vedas, declare that there is nothing else. Their flowery words are exuberant with various specific rites as the means to pleasure and power and are the causes of

(new) births as the result of their works (performed with desire).

[Samādhi has been rendered into "mind" in the above. The generally accepted significance of the term (absorption in God-consciousness produced by deep meditation) would give an equally consistent and happy meaning: Persons attached to pleasure and power cannot have perfect steadiness of mind in divine meditation.

Panegyric words of the Vedas: The Karma-Kānda or the sacrificial portion of the Vedas which lays down specific rules for specific actions and their fruits, and extols these latter unduly. *Nothing else:* Beyond the heavenly enjoyments procurable by the sacrificial rites of the Vedas.]

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्
।।४५।।

वेदा: The Vedas त्रैगुण्यविषया: deal with the three Gunas अर्जुन O Arjuna (त्वम् thou) निस्त्रैगुण्य: free from the triad of Gunas भव be निर्द्वन्द्व: free from the pairs of opposites नित्यसत्त्वस्थ: ever-balanced निर्योगक्षेम: free from getting and keeping आत्मवान् established in the Self.

45. The Vedas deal with the three Gunas. Be thou free, O Arjuna, from the triad of the Gunas, free from the pairs of opposites, ever-balanced, free from (the thought of) getting and keeping, and established in the Self.

[*The Vedas deal with etc.:* That is to say, the Vedas treat of relativity. *Pairs of opposites:* Dvandva, all correlated ideas and sensations, e.g., good and bad, pleasure and pain, heat and cold, light and darkness, etc.

Guna is a technical term of the Sānkhya philosophy, also used in the same sense by the Vedānta. Prakriti or Nature is constituted of three Gunas; Sattva (equilibrium), Rajas (attraction), Tamas (inertia). Prakriti *is* the three Gunas, *not* that she *has* them. Guna is wrongly translated as quality; it is substance as well as quality, matter, *and* force. Wherever there is name and form, there is Guna. Guna also means a rope, that which binds.]

यावानर्थ उदपाने सर्वतः संप्लुतोदके ।।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ।।४६।।

सर्वतः Everywhere संप्लुतोदके being flooded उदपाने in a reservoir यावान् as much अर्थः use विजानतः ब्राह्मणस्य of the knowing Brāhmana सर्वेषु in all वेदेषु the Vedas तावान् so much (use).

46. To the Brāhmana who has known the Self, all the Vedas are of so much use as a reservoir is, when there is a flood everywhere.

[A man possessed of Self-knowledge has no need whatever of the Vedas. This does not, however, mean that the Vedas are useless; only to the knower of Brahman they have no value, as the transient pleasures deriv-

able from them are comprehended in the infinite bliss of Self-knowledge.]

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।४७।।

कर्मणि In work एव only ते thy अधिकार: right कदाचन ever फलेषु in fruits मा not कर्मफलहेतु: the producer of the results of acts मा भू: shouldst not be अकर्मणि in inaction ते thy सङ्ग: attachment मा not अस्तु let be.

47. Thy right is to work only; but never to the fruits thereof. Be thou not the producer of the fruits of (thy) actions; neither let thy attachment be towards inaction.

[*Be thou not the producer, etc.:* That is, do not work with any desire for results, for actions produce fruits or bondage only if they are performed with desire.

Karma primarily means action, but a much profounder meaning has come to be attached to this word. It means the destiny forged by one in one's past incarnation or present: the store of tendencies, impulses, characteristics, and habits laid by, which determines the future embodiment, environment, and the whole of one's organisation.

Another meaning of Karma often used in reference to one's caste or position in life, is duty, the course of conduct which one ought to follow in pursuance of the tendencies which one acquired in one's past, with a view

to working them out and regaining the pristine purity of the Self.]

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ।।४८।।

धनञ्जय O Dhananjaya योगस्थः steadfast in Yoga सङ्गं attachment त्यक्त्वा abandoning सिद्ध्यसिद्ध्योः in regard to success and failure समः the same भूत्वा being कर्माणि actions कुरु perform समत्वं evenness of mind (in regard to success and failure) योगः Yoga उच्यते is called.

48. Being steadfast in Yoga, O Dhananjaya, perform actions, abandoning attachment, remaining unconcerned as regards success and failure. This evenness of mind (in regard to success and failure) is known as Yoga.

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ।।४९।।

धनञ्जय O Dhananjaya हि as बुद्धियोगात् than work performed with the mind undisturbed by thoughts of results दूरेण by far कर्म work अवरं inferior बुद्धौ in evenness of mind शरणम् refuge अन्विच्छ seek फलहेतवः seekers after results कृपणाः wretched.

49. Work (with desire) is verily far inferior to that performed with the mind undisturbed by thoughts of results. O

Dhananjaya, seek refuge in this evenness of mind. Wretched are they who act for results.

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्
।।५०।।

बुद्धियुक्त: Endued with evenness of mind इह in this (life) उभे both सुकृतदुष्कृते virtue and vice जहाति casts off तस्मात् therefore योगाय to Yoga युज्यस्व devote thyself. योग: Yoga कर्मसु in work कौशलम् dexterity.

50. Endued with this evenness of mind, one frees oneself in this life, alike from vice and virtue. Devote thyself, therefore, to this Yoga. Yoga is the very dexterity of work.

[*Alike from vice and virtue:* A follower of Karma-Yoga can have no personal motive for any action. Our action without motive becomes colourless, loses its character of vice or virtue.

Dexterity of work: It is the nature of work to produce bondage. Karma-Yoga is the dexterity of work, because it not only robs work of its power to bind, but also transforms it into an efficient means of freedom.]

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ।।५१।।

बुद्धियुक्ता: Possessed of evenness of mind मनीषिण: the wise कर्मजं फलं the fruit of action त्यक्त्वा abandoning जन्मबन्धविनिर्मुक्ता: freed from the fetters of birth अनामयं beyond evil पदं state हि verily गच्छन्ति go to.

51. The wise, possessed of this evenness of mind, abandoning the fruits of their actions, freed for ever from the fetters of birth, go to that state which is beyond all evil.

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ।।५२।।

यदा When ते thy बुद्धि: intellect मोहकलिलं taint of illusion व्यतितरिष्यति crosses beyond तदा then श्रोतव्यस्य of what is to be heard श्रुतस्य and of what is heard निर्वेदं indifference गन्तासि thou shalt attain.

52. When thy intellect crosses beyond the taint of illusion, then shalt thou attain to indifference, regarding things heard and things yet to be heard.

[*The taint of illusion:* the identifying of the Self with the non-Self, the ego.]

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ।।५३।।

यदा When ते thy श्रुतिविप्रतिपन्ना tossed about by the conflict of opinions बुद्धि: intellect अचला firmly established

समाधौ in the Self निश्चला immovable स्थास्यति will remain तदा then योगं Self-realisation अवाप्स्यसि shalt attain.

53. When thy intellect, tossed about by the conflict of opinions, has become immovable and firmly established in the Self, then thou shalt attain Self-realisation.

अर्जुन उवाच ।

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्
।।५४।।

अर्जुनः Arjuna उवाच said:

केशव O Keshava स्थितप्रज्ञस्य of the (man of) steady wisdom समाधिस्थस्य of the (man) merged in Samādhi का what भाषा description स्थितधीः (the man of) steady wisdom किं what प्रभाषेत speaks किम् what (how) आसीत sits किम् what (how) व्रजेत walks.

Arjuna said:

54. What, O Keshava, is the description of the man of steady wisdom, merged in Samādhi? How (on the other hand) does the man of steady wisdom speak, how sit, how walk?

[Arjuna is asking, (1) what is the state of the mind of the man of realisation when in Samādhi? and (2) how is its influence shown in his conduct when out of it?

Steady wisdom: Settled conviction of one's identity with Brahman gained by direct realisation.]

श्रीभगवानुवाच ।
प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।।५५।।

श्रीभगवान् The Blessed Lord उवाच said:

पार्थ O Pārtha यदा when सर्वान् all मनोगतान् of the mind कामान् desires प्रजहाति casts off आत्मनि एव in the Self alone आत्मना by the Self तुष्टः satisfied तदा then स्थितप्रज्ञः of steady wisdom उच्यते is said.

The Blessed Lord said:

55. When a man completely casts away, O Pārtha, all the desires of the mind, satisfied in the Self alone by the Self, then is he said to be one of steady wisdom.

[This answers the first part of Arjuna's question.]

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ।।५६ ।।

दुःखेषु In adversity अनुद्विग्नमनाः of unshaken mind सुखेषु in happiness विगतस्पृहः without hankering वीतरागभयक्रोधः free from affection, fear, and wrath मुनिः Muni स्थितधीः of steady wisdom उच्यते is said.

56. He whose mind is not shaken by adversity, who does not hanker after happiness, who has become free from affection, fear, and wrath, is indeed the Muni of steady wisdom.

[This and the following two shlokas answer the second part of Arjuna's question, as to the conduct of one of perfect realisation.

Muni: Man of meditation.]

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ।।५७।।

यः Who सर्वत्र everywhere अनभिस्नेहः without attachment तत् तत् whatever शुभाशुभम् good and evil प्राप्य receiving न अभिनन्दति does not rejoice न द्वेष्टि is not vexed तस्य his प्रज्ञा wisdom प्रतिष्ठिता is fixed.

57. He who is everywhere unattached, not pleased at receiving good, nor vexed at evil, his wisdom is fixed.

[*Not pleased, etc.:* consequently he does not praise or blame. This is an answer to the query: "How does he speak?"]

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।।५८।।

यदा When च also अयं this (Yogi) कूर्मः tortoise अङ्गानि limbs इव like इन्द्रियार्थेभ्यः from sense-objects इन्द्रियाणि

senses सर्वशः completely संहरते withdraws तस्य his प्रज्ञा wisdom प्रतिष्ठिता is steadied.

58. When also, like the tortoise drawing its limbs, he can completely withdraw the senses from their objects, then his wisdom becomes steady.

[*Withdraw the senses:* bring the mind back upon the Self from all sense-objects. This is known as Pratyāhāra in Yoga.

To explain the shloka more fully: a man of the highest realisation can, at any moment, shake himself clear of all impressions of the sense-world and go into Samādhi, with the ease and naturalness of a tortoise drawing its limbs within itself.]

विषया विनिवर्तन्ते निराहारस्य देहिनः ।।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ।।५९।।

निराहारस्य Abstinent देहिनः of the man विषयाः objects विनिवर्तन्ते fall away रसवर्जं leaving the longing (तु but) परं the Supreme दृष्ट्वा having seen अस्य of this (man of settled wisdom) रसः longing अपि even निवर्तते falls away.

59. Objects fall away from the abstinent man, leaving the longing behind. But his longing also ceases, who sees the Supreme.

[Abstinent man: An unillumined person abstaining from sense-pleasure for penance, or because of physical incapacity.]

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ।।६०।।

कौन्तेय O Kaunteya यततः striving विपश्चितः पुरुषस्य of a wise man अपि even हि indeed प्रमाथीनि turbulent इन्द्रियाणि senses प्रसभं violently मनः mind हरन्ति snatch away.

60. The turbulent senses, O son of Kunti, do violently snatch away the mind of even a wise man, striving after perfection.

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता।।६१।।

युक्तः The steadfast तानि them सर्वाणि all संयम्य having controlled मत्परः focussed on Me as the Supreme आसीत sits हि verily यस्य whose इन्द्रियाणि senses वशे under control तस्य his प्रज्ञा wisdom प्रतिष्ठिता settled.

61. The steadfast, having controlled them all, sits focussed on Me as the Supreme. His wisdom is steady, whose senses are under control.

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।।
सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते ।।६२।।

विषयान् Objects ध्यायतः thinking पुंसः of a man तेषु in them सङ्गः attachment उपजायते is produced सङ्गात् from attachment कामः longing संजायते is born कामात् from longing क्रोधः anger अभिजायते grows.

62. Thinking of objects, attachment to them is formed in a man. From attachment longing, and from longing anger grows.

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।६३।।

क्रोधात् From anger सम्मोहः delusion भवति comes सम्मोहात् from delusion स्मृतिविभ्रमः loss of memory स्मृतिभ्रंशात् from loss of memory बुद्धिनाशः the ruin of discrimination बुद्धिनाशात् from the ruin of discrimination प्रणश्यति (he) perishes.

63. From anger comes delusion, and from delusion loss of memory. From loss of memory comes the ruin of discrimination, and from the ruin of discrimination he perishes.

[A beautiful image appears. The tendency of the mind is to repeat it. Then, if the image is allowed to recur, a liking grows. With the growth of liking the wish to come close, to possess, appears. Any obstacle to this produces wrath. The impulse of anger throws the mind into confusion, which casts a veil over the lessons of wisdom learnt by past experience. Thus deprived of his moral standard, he is prevented from using his discrimination. Failing in discrimination, he acts irrationally, on the impulse of passion, and paves the way to moral death.

Thus Krishna traces moral degradation to those

first breaths of thought that come softly and almost unconsciously to the mind.]

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ॥
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥६४॥

तु But रागद्वेषवियुक्तैः: free from attraction and aversion आत्मवश्यैः: self-restrained इन्द्रियैः: with senses विषयान् objects चरन् moving (amongst) विधेयात्मा the self-controlled प्रसादम् tranquillity अधिगच्छति attains.

64. But the self-controlled man, moving among objects with senses under restraint, and free from attraction and aversion, attains to tranquillity.

[The above is in answer to Arjuna's fourth question, "How does he move?"]

प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥६५॥

प्रसादे In tranquillity अस्य of him सर्वदुःखानां of all sorrows हानिः destruction उपजायते happens प्रसन्नचेतसः of the tranquil-minded हि because आशु soon बुद्धिः intellect पर्यवतिष्ठते is established in firmness.

65. In tranquillity, all sorrow is destroyed. For the intellect of him, who is tranquil-minded, is soon established in firmness.

[That is, firmly concentrates itself on the Self.]

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।।
न चाभावयतः शान्ति अशान्तस्य कुतः सुखम्
।।६६।।

अयुक्तस्य Of the unsteady बुद्धिः knowledge (of the Self) नास्ति is not अयुक्तस्य of the unsteady भावना meditation च also न not अभावयतः च and of the unmeditative शान्तिः peace न not अशान्तस्य of the peaceless सुखम् happiness कुतः whence.

66. No knowledge (of the Self) has the unsteady. Nor has he meditation. To the unmeditative there is no peace. And how can one without peace have happiness?

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ।।६७।।

हि For चरतां wandering इन्द्रियाणां senses यत् which मनः mind अनुविधीयते follows तत् that अस्य his वायुः wind अम्भसि in water नावम् boat इव like प्रज्ञां discrimination हरति scatters.

67. For, the mind, which follows in the wake of the wandering senses, carries away his discrimination, as a wind (carries away from its course) a boat on the waters.

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता
।।६८।।

महाबाहो Mighty-armed तस्मात् therefore यस्य whose इन्द्रियाणि senses इन्द्रियार्थेभ्यः from sense-objects सर्वशः completely निगृहीतानि restrained तस्य his प्रज्ञा knowledge प्रतिष्ठिता (is) steady.

68. Therefore, O mighty-armed, his knowledge is steady, whose senses are completely restrained from their objects.

[This does not mean that the senses remain completely estranged, but that they are all estrangeable at will.]

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः
।।६९।।

सर्वभूतानां Of all beings या what निशा night संयमी the self-controlled तस्यां in that जागर्ति keeps awake यस्यां in what भूतानि all beings जाग्रति are awake पश्यतः seeing (the Self) मुनेः of the Muni सा that निशा night.

69. That which is night to all beings, in that the self-controlled man wakes. That in which all beings wake, is night to the Self-seeing Muni.

[Where all beings are in darkness, there the Muni sees, and *vice versa*. The consciousness of the man of realisation is so full of God that he cannot see anything apart from Him. The ignorant man, on the other hand, lives in the world of plurality alone and God is a non-entity to him.

It follows, that non-susceptibility to the influences of Nature, that is, perfect self-control (spoken of in the preceding shloka) is quite as natural a trait of the illumined soul as its opposite is of the ignorant.]

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ।।७०।।

यद्वत् As आपूर्यमाणम् filled from all sides अचलप्रतिष्ठं based in stillness समुद्रम् ocean आपः waters प्रविशन्ति enter तद्वत् so सर्वे all कामाः desires यं to which (मुनिं Muni) प्रविशन्ति enter सः he शान्तिम् peace आप्नोति attains कामकामी desirer of desires न not.

70. As into the ocean—brimful, and still—flow the waters, even so the Muni into whom enter all desires, he, and not the desirer of desires, attains to peace.

[The ocean is not at all affected by the waters flowing into it from all sides. Similarly, that man alone finds true peace in whom no reaction of desire is produced by the objects of enjoyment, which he happens to come across during his sojourn on earth.]

विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः ।।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ।।७१।।

यः that पुमान् man सर्वान् all कामान् desires विहाय abandoning निस्पृहः devoid of longing निरहंकारः without the sense of "I" निर्ममः without the sense of "mine" चरति moves (lives) सः he शान्तिम् peace अधिगच्छति attains.

71. That man who lives devoid of longing, abandoning all desires, without the sense of "I" and "mine", he attains to peace.

[*The man who lives*—merely to work out his past Karma.]

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति
।।७२।।

पार्थ O Pārtha एषा this ब्राह्मी स्थितिः (having one's) being in Brahman एनां this प्राप्य attaining न not विमुह्यति is deluded अन्तकाले at the end of life अपि even अस्याम् therein स्थित्वा having stayed ब्रह्मनिर्वाणम् oneness with Brahman ऋच्छति attains.

72. This is to have one's being in Brahman, O son of Prithā. None, attaining to this, becomes deluded. Being established therein, even at the end of life, a man attains to oneness with Brahman.

इति सांख्ययोगो नाम द्वितीयोऽध्यायः ।।२।।

The end of the second chapter, designated, *The Way of Knowledge.*

॥ तृतीयोऽध्यायः ॥

THIRD CHAPTER

अर्जुन उवाच ।

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ॥
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥१॥

अर्जुनः Arjuna उवाच said:

जनार्दन O Janārdana केशव O Keshava चेत् if कर्मणः to action बुद्धिः knowledge ज्यायसी superior ते by Thee मता considered तत् then किं why घोरे terrible कर्मणि in action मां me नियोजयसि engagest.

Arjuna said:

1. If, O Janārdana, according to Thee, knowledge is superior to action, why then, O Keshava, dost Thou engage me in this terrible action?

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ॥
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥२॥

व्यामिश्रेण Conflicting वाक्येन with words इव seemingly मे my बुद्धिं understanding मोहयसि art bewildering इव as it were तत् that एकं one निश्चित्य for certain वद tell येन by which अहम् I श्रेयः highest आप्नुयाम् shall attain.

2. With these seemingly conflicting words, Thou art, as it were, bewildering my understanding;—tell me that one thing for certain, by which I can attain to the highest.

श्रीभगवानुवाच ।

लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ।।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्
।।३।।

श्रीभगवान् The Blessed Lord उवाच said:

अनघ O sinless one! अस्मिन् in this लोके world द्विविधा twofold निष्ठा (path of) devotion मया by Me पुरा in the beginning प्रोक्ता said ज्ञानयोगेन by the path of knowledge सांख्यानां of the meditative कर्मयोगेन by the path of action योगिनाम् of the active.

The Blessed Lord said:

3. In the beginning (of creation), O sinless one, the twofold path of devotion was given by Me to this world;—the path of knowledge for the meditative, the path of work for the active.

[*Meditative*—those who prefer meditation to external action.

Active—those who believe in external work with or without meditation.]

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।।
न च संन्यसनादेव सिद्धिं समधिगच्छति ।।४।।

पुरुष: A person कर्मणाम् of works अनारम्भात् from non-performance नैष्कर्म्यं worklessness न not अश्नुते reaches च and संन्यसनात् from giving up एव merely सिद्धि perfection न not समधिगच्छति attains.

4. By non-performance of work none reaches worklessness; by merely giving up action no one attains to perfection.

[*Worklessness and perfection*: These are synonymous terms, meaning, becoming one with the Infinite and free from all ideas of want. A man who has reached this state can have no necessity or desire for work as a means to an end. Perfect satisfaction in the Self is his natural condition. (*Vide* III. 17).]

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ।।५।।

जातु Ever क्षणम् for an instant अपि even कश्चित् anyone अकर्मकृत् without performing action न not हि verily तिष्ठति rests हि for प्रकृतिजै: born of Prakriti गुणै: by the Gunas सर्व: all अवश: helpless कर्म action कार्यते are made to do.

5. Verily none can ever rest for even an instant, without performing action; for all are made to act, helplessly indeed, by the Gunas, born of Prakriti.

[*All are made to act:* All men living under bondage.]

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ।।६।।

यः Who कर्मेन्द्रियाणि organs of action संयम्य restraining मनसा by the mind इन्द्रियार्थान् sense-objects स्मरन् remembering आस्ते sits सः he विमूढात्मा of deluded understanding मिथ्याचारः hypocrite उच्यते is called.

6. He, who restraining the organs of action, sits revolving in the mind, thoughts regarding objects of sense, he, of deluded understanding, is called a hypocrite.

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ।।७।।

अर्जुन O Arjuna यः who तु but इन्द्रियाणि senses मनसा by the mind नियम्य controlling असक्तः unattached कर्मेन्द्रियैः by the organs of action कर्मयोगम् path of work आरभते follows सः he विशिष्यते excels.

7. But, O Arjuna, he who, controlling the senses by the mind, unattached, directs his organs of action to the path of work, excels.

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ।।८।।

त्वं Thou नियतं obligatory कर्म action कुरु perform हि for अकर्मणः to inaction कर्म action ज्यायः superior अकर्मणः (of the) inactive ते thy शरीरयात्रा maintenance of the body अपि even च and न not प्रसिध्येत् would be possible.

8. Do thou perform obligatory[1] action; for action is superior to inaction; and even the bare maintenance of thy body would not be possible if thou art inactive.

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ।।९।।

यज्ञार्थात् For the sake of Yajna कर्मणः of action अन्यत्र otherwise अयं this लोकः world कर्मबन्धनः bound by action कौन्तेय O Kaunteya (अतः therefore) तदर्थं for that मुक्तसङ्गः devoid of attachment कर्म action समाचर perform.

9. The world is bound by actions other than those performed for the sake of Yajna; do thou, therefore, O son of Kunti, perform action for Yajna alone, devoid of attachment.

[*Yajna:* means a religious rite, sacrifice, worship: or an action done with a good or spiritual motive. It also means the Deity. The Taittiriya-Samhita (I. vii. 4.) says, "Yajna is Vishnu Himself."]

[1] See comment on V. 13.

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।।१०।।

पुरा In the beginning प्रजापतिः the Prajāpati सहयज्ञाः together with Yajna प्रजाः mankind सृष्ट्वा having created उवाच said अनेन by this प्रसविष्यध्वम् shall (ye) multiply एषः this वः your इष्टकामधुक् milch cow of desires अस्तु let be.

10. The Prajāpati, having in the beginning created mankind together with Yajna, said, "By this shall ye multiply: this shall be the milch cow of your desires.

[*Prajāpati*—the creator or Brahmā.]

देवान् भावयतानेन ते देवा भावयन्तु वः ।।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।।११।।

अनेन With this देवान् the Devas भावयत cherish ते those देवाः Devas वः you भावयन्तु may cherish परस्परं one another भावयन्तः cherishing परम् highest श्रेयः good अवाप्स्यथ (ye) shall gain.

11. "Cherish the Devas with this, and may those Devas cherish you: thus cherishing one another, ye shall gain the highest good.

[*Devas:* (lit. the shining ones) beings much higher than man in the scale of evolution, who are in charge of cosmic functions.]

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः।।१२।।

देवाः The Devas यज्ञभाविताः cherished by Yajna इष्टान् desired-for भोगान् objects वः to you दास्यन्ते will give हि so तैः by them दत्तान् given एभ्यः to them अप्रदाय without offering यः who भुङ्क्ते enjoys सः he स्तेनः thief एव verily.

12. "The Devas, cherished by Yajna, will give you desired-for objects." So, he who enjoys objects given by the Devas without offering (in return) to them, is verily a thief.

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्
।।१३।।

यज्ञशिष्टाशिनः Eating the remnants of Yajna सन्तः the good सर्वकिल्बिषैः from all sins मुच्यन्ते are freed ये who तु but आत्मकारणात् for themselves पचन्ति cook ते they पापाः sinful ones अघं sin भुञ्जते eat.

[*Prakriti of beings:* the material nature or delusion of beings due to Avidyā.]

इति क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः ।।

The end of the thirteenth chapter, designated, *The Discrimination of the Kshetra and the Kshetrajna.*

॥ चतुर्दशोऽध्यायः ॥

FOURTEENTH CHAPTER

श्रीभगवानुवाच ।

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ॥
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥१॥

श्रीभगवान् The Blessed Lord उवाच said:

ज्ञानानां Of all knowledge उत्तमम् the best परं supreme ज्ञानम् knowledge भूय. again प्रवक्ष्यामि I shall tell यत् which ज्ञात्वा having known सर्वे all मुनयः the Munis इतः after this life परां high सिद्धिम् perfection गताः have attained to.

The Blessed Lord said:

1. Again I shall tell thee that supreme knowledge which is above all knowledge, having known which all the Munis have attained to high perfection after this life.

[*After this life:* after being freed from this bondage of the body.]

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥२॥

इदं This ज्ञानम् knowledge उपाश्रित्य having devoted to मम साधर्म्यम् My Being आगताः have attained to सर्गे at the

time of creation अपि न neither उपजायन्ते are born प्रलये at the time of dissolution न च nor व्यथन्ति are (they) troubled.

2. They who, having devoted themselves to this knowledge, have attained to My Being, are neither born at the time of creation, nor are they troubled at the time of dissolution.

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।।
सम्भवः सर्वभूतानां ततो भवति भारत ।।३।।

भारत O descendant of Bharata महत् the great ब्रह्म Prakriti मम My योनिः womb तस्मिन् in that अहम् I गर्भं the germ दधामि place ततः thence सर्वभूतानां of all beings सम्भवः the birth भवति is.

3. My womb is the great Prakriti; in that I place the germ; from thence, O descendant of Bharata, is the birth of all beings.

[*Brahma:* This word is derived from Brimh, "to expand", and means here the vast seed or womb (the Prakriti) out of which the cosmos is evolved or expanded.

I place the germ: I infuse the reflection of My Intelligence, and this act of impregnation is the cause of the evolution of the cosmos.]

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः ।।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ।।४।।

कौन्तेय O son of Kunti **सर्वयोनिषु** in all the wombs **याः** whatever **मूर्तयः** forms **सम्भवन्ति** are produced **तासां** their **महत्** the great **ब्रह्म** Prakriti **योनिः** womb **अहं** I **बीजप्रदः** seed-giving **पिता** Father.

4. Whatever forms are produced, O son of Kunti, in all the wombs, the great Prakriti is their womb, and I the seed-giving Father.

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।।५।।

महाबाहो O mighty-armed **सत्त्वं** Sattva **रजः** Rajas **तमः** Tamas **इति** these **प्रकृतिसम्भवाः** born of Prakriti **गुणाः** Gunas **देहे** in the body **अव्ययम्** the indestructible **देहिनम्** the embodied one **निबध्नन्ति** bind fast.

5. Sattva, Rajas, and Tamas—these Gunas, O mighty-armed, born of Prakriti, bind fast in the body the indestructible embodied one.

[*These Gunas:* are the primary constituents of the Prakriti and are the bases of all substances; they cannot therefore be said to be attributes or qualities inhering in the substances as opposed to the substances.

Embodied one: he who abides in the body as if identified therewith.]

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ।।६।।

अनघ O sinless one तत्र of these निर्मलत्वात् from its stainlessness प्रकाशकम् luminous अनामयम् free from evil सत्त्वं Sattva सुखसङ्गेन by attachment to happiness ज्ञानसङ्गेन by attachment to knowledge च and बध्नाति binds.

6. Of these Sattva, because of its stainlessness, luminous and free from evil, binds, O sinless one, by attachment to happiness, and by attachment to knowledge.

[*Binds by attachment to happiness, etc.:* Binds the Self by the consciousness of happiness and knowledge in the shape of "I am happy", "I am wise", which belongs properly to the Kshetra, but which is associated with the Self, the Absolute Intelligence and Bliss, through Avidyā.]

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ।।७।।

कौन्तेय O son of Kunti रागात्मकं of the nature of passion रजः Rajas तृष्णासङ्गसमुद्भवम् giving rise to thirst and attachment विद्धि know तत् it कर्मसङ्गेन by attachment to action देहिनम् the embodied one निबध्नाति binds fast.

7. Know Rajas to be of the nature of passion, giving rise to thirst and attachment;

it binds fast, O son of Kunti, the embodied one, by attachment to action.

[*It binds, etc.:* Though the Self is not the agent, Rajas makes him act with the idea, "*I* am the doer".]

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ।।८।।

भारत O descendant of Bharata तमः Tamas तु and अज्ञानजं born of ignorance सर्वदेहिनाम् all embodied beings मोहनं stupefying विद्धि know तत् it प्रमादालस्यनिद्राभिः by miscomprehension, indolence, and sleep निबध्नाति binds fast.

8. And know Tamas to be born of ignorance, stupefying all embodied beings; it binds fast, O descendant of Bharata, by miscomprehension, indolence, and sleep.

[*Stupefying:* causing delusion or non-discrimination.]

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ।।९।।

भारत O descendant of Bharata सत्त्वं Sattva सुखे to happiness सञ्जयति attaches रजः Rajas कर्मणि to action उत while तमः Tamas तु indeed ज्ञानम् discrimination आवृत्य shrouding प्रमादे to miscomprehension सञ्जयति attaches.

9. Sattva attaches to happiness, and Rajas to action, O descendant of Bharata; while Tamas, verily, shrouding discrimination, attaches to miscomprehension.

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ।।१०।।

भारत O descendant of Bharata सत्त्वं Sattva रजः Rajas तमः Tamas च and अभिभूय predominating over भवति arises रजः Rajas सत्त्वं Sattva तमः च and Tamas एव likewise तथा so तमः Tamas सत्त्वं Sattva रजः Rajas च and.

10. Sattva arises, O descendant of Bharata, predominating over Rajas and Tamas; likewise Rajas over Sattva and Tamas; so, Tamas over Sattva and Rajas.

[When one or the other of the Gunas asserts itself predominating over the other two, it produces its own effect, Sattva produces knowledge and happiness; Rajas, action; Tamas, veiling of discrimination, etc.]

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ।।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ।।११।।

यदा When अस्मिन् this देहे in body सर्वद्वारेषु through every sense ज्ञानं (of) *intelligence* प्रकाशः *light* उपजायते shines तदा then उत indeed सत्त्वम् Sattva विवृद्धं (is) predominant इति that विद्यात् (it) should be known.

11. When through every sense in this body, the light of intelligence shines, then it should be known that Sattva is predominant.

[*Every sense:* lit., all the gates. All the senses are for the Self the gateways of perception.]

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ।।१२।।

भरतर्षभ O bull of the Bhāratas लोभः greed प्रवृत्तिः activity कर्मणाम् of actions आरम्भः the undertaking अशमः unrest स्पृहा longing एतानि these रजसि Rajas विवृद्धे having become predominant जायन्ते arise.

12. Greed, activity, the undertaking of actions, unrest, longing—these arise when Rajas is predominant, O bull of the Bhāratas.

[*Unrest:* being agitated with joy, attachment, etc.]

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ।।१३।।

कुरुनन्दन O descendant of Kuru अप्रकाशः darkness अप्रवृत्तिः inertness च and प्रमादः miscomprehension मोहः delusion एव also च and एतानि these तमसि Tamas विवृद्धे having become predominant जायन्ते arise.

13. Darkness, inertness, miscomprehension, and delusion—these arise when Tamas is predominant, O descendant of Kuru.

[*Darkness, inertness:* Absence of discrimination, and its results, e. g., inertness, etc.]

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ।।१४।।

यदा तु When सत्त्वे Sattva प्रवृद्धे having become predominant देहभृत् the embodied one प्रलयं death याति meets तदा then उत्तमविदां of the knowers of the Highest अमलान् the spotless लोकान् worlds प्रतिपद्यते (he) attains.

14. If the embodied one meets death wnen Sattva is predominant, then he attains to the spotless regions of the worshippers of the Highest.

[*Spotless regions:* The Brahma-loka and the like.
The Highest: Deities such as Hiranyagarbha.]

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ।।१५।।

रजसि In Rajas प्रलयं death गत्वा meeting कर्मसङ्गिषु among those attached to action जायते (he) is born तथा so तमसि in Tamas प्रलीनः dying मूढयोनिषु in the wombs of the irrational जायते (he) is born.

15. Meeting death in Rajas he is born among those attached to action; so dying in Tamas, he is born in the wombs of the irrational.

[*Meeting . . . Rajas*: If he dies when Rajas is predominant in him.]

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ।।१६।।

सुकृतस्य Good कर्मणः of action निर्मलं pure सात्त्विकं Sāttvika फलम् the fruit आहुः they say रजसः of Rajas तु verily दुःखम् pain फलं the fruit तमसः of Tamas अज्ञानं ignorance फलम् the fruit.

16. The fruit of good action, they say, is Sāttvika and pure; verily, the fruit of Rajas is pain, and ignorance is the fruit of Tamas.

[*Rajas*: means Rājasika action, and Tamas, Tāmasika action, as this section treats of actions.]

सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च ।।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ।।१७।।

सत्त्वात् From Sattva ज्ञानं wisdom सञ्जायते arises रजसः from Rajas लोभः greed एव indeed च and तमसः from Tamas अज्ञानम् ignorance प्रमादमोहौ miscomprehension and delusion एव even च and भवतः arise.

17. From Sattva arises wisdom, and from Rajas greed; miscomprehension, delusion and ignorance arise from Tamas.

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ।।१८।।

सत्त्वस्थाः The Sattva-abiding ऊर्ध्वं upwards गच्छन्ति go राजसाः the Rājasika मध्ये in the middle तिष्ठन्ति dwell जघन्यगुणवृत्तिस्थाः abiding in the function of the lowest Guna तामसाः the Tāmasika अधः downwards गच्छन्ति go.

18. The Sattva-abiding go upwards; the Rājasika dwell in the middle; and the Tāmasika, abiding in the function of the lowest Guna, go downwards.

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ।।१९।।

यदा When द्रष्टा the seer गुणेभ्यः than the Gunas अन्यं other कर्तारं agent न no अनुपश्यति beholds गुणेभ्यः than the Gunas च and परं higher वेत्ति knows तदा then सः he मद्भावं My being अधिगच्छति attains to.

19. When the seer beholds no agent other than the Gunas and knows That which is higher than the Gunas, he attains to My being.

[*The Gunas:* which transform themselves into the bodies, senses, and sense-objects, and which in

all their modifications constitute the agent in all actions.

Knows. . .the Gunas: Sees Him who is distinct from the Gunas, who is the Witness of the Gunas and of their functions.]

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ।।२०।।

देहसमुद्भवान् Out of which the body is evolved एतान् these त्रीन् three गुणान् Gunas अतीत्य having gone beyond जन्ममृत्युजरादुःखैः from birth, death, decay, and pain विमुक्तः freed देही the embodied one अमृतम् immortality अश्नुते attains to.

20. The embodied one having gone beyond these three Gunas, out of which the body is evolved, is freed from birth, death, decay, and pain, and attains to immortality.

अर्जुन उवाच ।
कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ।।२१।।

अर्जुनः Arjuna उवाच said:

प्रभो O Lord कैः by what लिङ्गैः marks एतान् these त्रीन् three गुणान् Gunas अतीतः भवति has gone beyond किमाचारः what (is his) conduct कथं how च and एतान् these त्रीन् three गुणान् Gunas अतिवर्तते does (he) pass beyond.

Arjuna said:

21. By what marks, O Lord, is he (known) who has gone beyond these three Gunas? What is his conduct, and how does he pass beyond these three Gunas?

श्रीभगवानुवाच ।

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।।

न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति।।२२।।

श्रीभगवान् The Blessed Lord उवाच said:

पाण्डव O Pāndava प्रकाशं light (the effect of Sattva) प्रवृत्तिं activity (the effect of Rajas) मोहम् delusion (the effect of Tamas) एव च and also सम्प्रवृत्तानि (when) come forth न not द्वेष्टि (he) hates निवृत्तानि when absent न nor कांक्षति longs for;

The Blessed Lord said:

22. He who hates not the appearance of light (the effect of Sattva), activity (the effect of Rajas), and delusion (the effect of Tamas), (in his own mind), O Pāndava, nor longs for them when absent;

[This answers Arjuna's first question. The man of right knowledge does not hate the effects of the three Gunas when they clearly present themselves as objects of consciousness; nor does he long after things which have disappeared.]

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ।।२३।।

य: Who उदासीनवत् like one unconcerned आसीन: sitting गुणै: by the Gunas न not विचाल्यते is moved गुणा: the Gunas वर्तन्ते operate इत्येव (knowing) that अवतिष्ठति is Self-centred न not इङ्गते swerves;

23. He who, sitting like one unconcerned, is moved not by the Gunas, who knowing that the Gunas operate, is Self-centred and swerves not;

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः।।२४।।

य: Who समदुःखसुख: alike in pleasure and pain स्वस्थ: Self-abiding समलोष्टाश्मकाञ्चन: regarding a clod of earth, a stone, and gold alike तुल्यप्रियाप्रिय: the same to agreeable and disagreeable धीर: firm तुल्यनिन्दात्मसंस्तुति: the same in censure and praise;

24. Alike in pleasure and pain, Self-abiding, regarding a clod of earth, a stone and gold alike; the same to agreeable and disagreeable, firm, the same in censure and praise;

[*Self-abiding:* He remains in his own true nature.]

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ।।२५।।

यः Who **मानापमानयोः** in honour and disgrace **तुल्यः** the same **मित्रारिपक्षयोः** to friend and foe **तुल्यः** the same **सर्वारम्भपरित्यागी** relinquishing all undertakings **सः** he **गुणातीतः** gone beyond the Gunas **उच्यते** is said.

25. The same in honour and disgrace, the same to friend and foe, relinquishing all undertakings—he is said to have gone beyond the Gunas.

[Inclining to neither of the dual throng, he firmly treads the path of Self-knowledge, and rises above the Gunas.

These three Shlokas are in answer to Arjuna's second question.]

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।।
स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते ।।२६।।

यः Who **च** and **मां** Me **अव्यभिचारेण** unswerving **भक्तियोगेन** with devotion **सेवते** serves **सः** he **एतान्** these **गुणान्** Gunas **समतीत्य** going beyond **ब्रह्मभूयाय** for becoming Brahman **कल्पते** is fitted.

26. And he who serves Me with unswerving devotion, he, going beyond the Gunas, is fitted for becoming Brahman.

[This answers Arjuna's third question.]

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ।।२७।।

हि For अहम् I ब्रह्मण: of Brahman प्रतिष्ठा the abode अव्ययस्य the Immutable अमृतस्य the Immortal च and शाश्वतस्य everlasting धर्मस्य of Dharma ऐकान्तिकस्य Absolute सुखस्य of Bliss च and.

27. For I am the abode of Brahman, the Immortal and Immutable, of everlasting Dharma and of Absolute Bliss.

[*I:* the Pratyagātman, the true Inner-Self.]

इति गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ।।

The end of the fourteenth chapter, designated, *The Discrimination of the Three Gunas.*

॥ पञ्चदशोऽध्यायः ॥

FIFTEENTH CHAPTER

श्रीभगवान् उवाच ।

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ॥
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१॥

श्रीभगवान् The Blessed Lord उवाच said:

ऊर्ध्वमूलम् Rooted above अधःशाखम् branching below अव्ययम् eternal अश्वत्थं Ashvattha प्राहुः they speak of छन्दांसि the Vedas यस्य whose पर्णानि leaves तं it यः who वेद knows सः he वेदवित् (is) Veda-knower.

The Blessed Lord said:

1. They speak of an eternal Ashvattha rooted above and branching below whose leaves are the Vedas; he who knows it, is a Veda-knower.

[*Ashvattha:* literally, that which does not endure till tomorrow: the Samsāra, the ever-changing, phenomenal world.

Brahman with Its unmanifested energy, **Māyā**, is spoken as the One "*above*", for It is supreme over all things; the One above is the root of this Tree of Samsāra, as such it is said to have its root above. Mahat, Ahamkāra, Tanmātras, etc., are its

branches evolving to grosser and grosser states—hence it is said to be branching "*below*". As leaves protect a tree, so do the Vedas protect the Tree of Samsāra, as treating of Dharma and Adharma, with their causes and fruits.

Eternal: because this Tree of Samsāra rests on a continuous series of births without beginning and end, and it cannot be cut down except by the knowledge, "I am Brahman."]

अधश्चोर्ध्वं प्रसृतास्तस्य शाखाः
गुणप्रवृद्धा विषयप्रवालाः ।।
अधश्च मूलान्यनुसन्ततानि
कर्मानुबन्धीनि मनुष्यलोके ।।२।।

तस्य Its गुणप्रवृद्धाः nourished by the Gunas विषयप्रवालाः sense-objects (are) its buds शाखाः branches अधः below ऊर्ध्वं above च and प्रसृताः spread मनुष्यलोके in the world of man कर्मानुबन्धीनि originating action मूलानि the roots अधः below च and अनुसन्ततानि are stretched forth.

2. Below and above spread its branches, nourished by the Gunas; sense-objects are its buds; and below in the world of man stretch forth the roots, originating action.

[*Below:* from man downwards.

Above: up to Brahmā.

Roots: The tap-root is the Lord "above"; the

secondary roots are the Samskāras, attachment, aversion, etc. It is these that, being in perpetual succession the cause and consequence of good and evil deeds, bind one fast to actions—Dharma and Adharma.]

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च सम्प्रतिष्ठा ।।
अश्वत्थमेनं सुविरूढमूल-
मसङ्गशस्त्रेण दृढेन छित्त्वा ।।३।।
ततः पदं तत्परिमार्गितव्यं
यस्मिन्गता न निवर्तन्ति भूयः ।।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ।।४।।

इह Here अस्य its रूपम् form न not उपलभ्यते is perceived तथा as such न neither अन्तः (its) end न nor आदिः (its) origin न च nor सम्प्रतिष्ठा (its) existence एनं this सुविरूढमूलम् firm-rooted अश्वत्थम् Ashvattha दृढेन strong असङ्गशस्त्रेण with the axe of non-attachment छित्त्वा having cut asunder ततः then तत् that पदं goal परिमार्गितव्यं is to be sought for यस्मिन् whither गताः going भूयः again न not निवर्तन्ति (they) return यतः whence (एषा the) पुराणी Eternal प्रवृत्तिः Activity प्रसृता streamed forth तम् in that एव च indeed आद्यं Primeval पुरुषं Purusha प्रपद्ये I seek refuge.

3-4. Its form is not here perceived as such, neither its end, nor its origin, nor its

existence. Having cut asunder this firm-rooted Ashvattha with the strong axe of non-attachment—then that Goal is to be sought for, going whither they (the wise) do not return again. I seek refuge in that Primeval Purusha whence streamed forth the Eternal Activity.

[*As such:* it cannot be said to exist, because it appears and vanishes every other moment. See commentary on II. 16.

Tat—That: Shankara and Ānandagiri read "Tatah", and explain it as beyond or above the Ashvattha, the Tree of Samsāra.

The Eternal Activity: this ever-passing work of projection, this ever-flowing current of evolution, the world of phenomena.]

निर्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ।।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञै-
र्गच्छन्त्यमूढाः पदमव्ययं तत् ।।५।।

निर्मानमोहाः Free from pride and delusion **जितसङ्गदोषाः** with the evil of attachment conquered **अध्यात्मनित्याः** ever dwelling in the Self **विनिवृत्तकामाः** with desires completely receded **सुखदुःखसंज्ञैः** known as pleasure and pain **द्वन्द्वैः** from the pairs of opposites **विमुक्ताः** liberated **अमूढाः** the undeluded **तत्** that **अव्ययं** Eternal **पदम्** Goal **गच्छन्ति** reach.

5. Free from pride and delusion, with the evil of attachment conquered, ever dwelling in the Self, with desires completely receded, liberated from the pairs of opposites known as pleasure and pain, the undeluded reach that Goal Eternal.

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ।।६।।

यत् Whither **गत्वा** going **न** not **निवर्तन्ते** (they) return **तत्** that **सूर्यः** the sun **न** not **भासयते** illumines **न** nor **शशाङ्कः** the moon **न** nor **पावकः** fire **तत्** that **मम** My **परमं** Supreme **धाम** Abode.

6. That the sun illumines not, nor the moon, nor fire; that is My Supreme Abode, going whither they return not.

ममैवांशो जीवलोके जीवभूतः सनातनः ।।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ।।७।।

मम एव Of Myself **सनातनः** eternal **अंशः** portion **जीवभूतः** having become a living soul **प्रकृतिस्थानि** abiding in the Prakriti **मनःषष्ठानि** with mind as the sixth **इन्द्रियाणि** the (five) senses **जीवलोके** in the world of life **कर्षति** draws (to itself).

7. An eternal portion of Myself having become a living soul in the world *of life, draws (to itself) the (five) senses*

with mind for the sixth, abiding in Prakriti.

[The Jiva or the individual soul is that aspect of the Supreme Self which manifests itself in every one as the doer and enjoyer, being limited by the Upādhis set up by Avidyā; but in reality, both are the same. It is like the Ākāsha (space) in the jar, which is a portion of the infinite Ākāsha, and becomes one with the latter on the destruction of the jar, the cause of limitation.]

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ।।८।।

ईश्वरः The Lord यत् when शरीरं a body अवाप्नोति obtains यत् when च and अपि also उत्क्रामति leaves वायुः the wind आशयात् from (their) seats गन्धान् the scents इव as एतानि these गृहीत्वा taking संयाति goes.

8. When the Lord obtains a body and when He leaves it, He takes these and goes, as the wind takes the scents from their seats (the flowers).

[*Lord:* Jiva spoken of in the preceding Shloka. When the Jiva leaves the body, then he draws round himself the senses and the Manas. When he enters another, he takes these again with him, i.e., he is born with these again.]

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।।
अधिष्ठाय मनश्चायं विषयानुपसेवते ।।९।।

अयं He श्रोत्रं the ear चक्षुः the eye स्पर्शनं the (organ of) touch रसनं the (organ of) taste च and घ्राणम् the (organ of) smell एव च as also मनः the mind अधिष्ठाय presiding over विषयान् objects उपसेवते experiences.

9. Presiding over the ear, the eye, the touch, the taste, and the smell, as also the mind, He experiences objects.

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ।।१०।।

उत्क्रामन्तं Transmigrating (from one body to another) स्थितं residing (in the same) वापि or भुञ्जानं experiencing गुणान्वितम् united with the Gunas विमूढाः the deluded न not अनुपश्यन्ति do see (Him) ज्ञानचक्षुषः those who have the eye of wisdom पश्यन्ति do see (Him)..

10. While transmigrating (from one body to another), or residing (in the same) or experiencing, or when united with the Gunas—the deluded do not see Him; but those who have the eye of wisdom behold Him.

[Though Ātman is nearest and comes most easily within the range of their consciousness in a variety of functions, still all do not see Him, because of their complete subservience to sense-objects.]

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ।।११।।

यतन्तः Striving (for perfection) योगिनः the Yogis एनं Him आत्मनि in themselves अवस्थितम् dwelling पश्यन्ति behold यतन्तः striving अपि even though अकृतात्मानः the men of unrefined self अचेतसः unintelligent एनं Him न not पश्यन्ति see.

11. The Yogis striving (for perfection) behold Him dwelling in themselves; but the unrefined and unintelligent, even though striving, see Him not.

[*The unrefined:* Whose mind has not been regenerated by Tapas and subjugation of the senses, whose mind is not purified.]

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्।।१२।।

आदित्यगतं Residing in the sun यत् which तेजः light अखिलम् the whole जगत् world भासयते illumines चन्द्रमसि in the moon च and यत् which अग्नौ in the fire च and यत् which तत् that तेजः light मामकम् Mine विद्धि know.

12. The light which residing in the sun illumines the whole world, that which is in the moon and in the fire—know that light to be Mine.

[*Light:* may also be understood to mean the light of consciousness.]

गामाविश्य च भूतानि धा। याम्यहमोजसा ।।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः
।।१३।।

अहम् I ओजसा with my energy गाम् the earth आविश्य entering भूतानि all beings धारयामि (I) support रसात्मकः watery सोमः moon च and भूत्वा becoming सर्वाः all ओषधीः the herbs पुष्णामि I nourish.

13. Entering the earth with My energy, I support all beings, and I nourish all the herbs, becoming the watery moon.

[*Energy*—Ojas: The energy of Ishvara, whereby the vast heaven and the earth are firmly held.

Nourish: by infusing sap into them.

The watery moon: The Soma, moon, is considered as the repository or the embodiment of all fluids (Rasas).]

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ।।१४।।

अहं I वैश्वानरः (the fire) Vaishvānara भूत्वा becoming प्राणिनां of living beings देहम् in the body आश्रितः abiding प्राणापानसमायुक्तः associated with Prāna and Apāna चतुर्विधम् fourfold अन्नं the food पचामि I digest.

14. Abiding in the body of living beings as (the fire) Vaishvānara, I, associated with Prāna and Apāna, digest the fourfold food.

[See IV. 29.

Vaishvānara: The fire abiding in the stomach.

Fourfold food: Food which has to be eaten by (1) mastication, (2) sucking, (3) licking, and (4) swallowing.]

सर्वस्य चाहं हृदि सन्निविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च ।।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ।।१५।।

अहं I सर्वस्य of all हृदि in the heart सन्निविष्टः centred च and मत्तः from Me स्मृतिः memory ज्ञानम् perception अपोहनं (their) loss च as well as सर्वैः all वेदैः by the Vedas च and अहम् I एव verily वेद्यः that which has to be known वेदान्तकृत् the Author of the Vedānta वेदवित् the Knower of the Veda च and अहम् I एव indeed.

15. I am centred in the hearts of all; memory and perception as well as their loss come from Me. I am verily that which has to be known by all the Vedas, I indeed am the Author of the Vedānta, and the Knower of the Veda am I.

[*Memory:* of what is experienced in the past births; and *knowledge*—of things transcending the ordinary limits of space, time, and visible nature.—*Ānandagiri.*

Come from Me: as the result of their good or evil deeds.

I indeed...Vedānta: It is I who am the Teacher of the wisdom of the Vedānta, and cause it to be handed down in regular succession.]

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।।१६।।

क्षरः The Perishable अक्षरः the Imperishable च and द्वौ two एव indeed इमौ these पुरुषौ (two) Purushas (beings) लोके in the world सर्वाणि all भूतानि beings क्षरः (are) the Perishable कूटस्थः the Kutastha अक्षरः the Imperishable उच्यते is called.

16. There are two Purushas in the world —the Perishable and the Imperishable. All beings are the Perishable, and the Kutastha is called Imperishable.

[*Two Purushas:* Two categories—arranged in two separate groups of beings—spoken of as "Purushas", as they are the Upādhis of the Purusha.

Imperishable: Māyā-Shakti of the Lord, the germ from which the perishable being is born.

Kutastha: That which manifests Itself in various forms of illusion and deception. It is said to be imperishable, as the seed of Samsāra is endless—in the sense that it does not perish in the absence of Brahma-Jnāna.]

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।।१७।।

अन्यः Another तु but उत्तमः the Supreme पुरुषः Purusha परमात्मा the Highest Self इति thus उदाहृतः called यः who ईश्वरः Lord अव्ययः the immutable लोकत्रयम् the three worlds आविश्य pervading बिभर्ति sustains (them).

17. But (there is) another, the Supreme Purusha, called the Highest Self, the immutable Lord, who pervading the three worlds, sustains them.

[*Another:* quite distinct from the two.

The three worlds: Bhuh (the Earth), Bhuvah (the Mid-Region), and Svah (the Heaven)]

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।।१८।।

यस्मात् As अहम् I क्षरम् the Perishable अतीतः transcend अक्षरात् than (to) the Imperishable अपि even उत्तमः superior च and अतः therefore लोके in the world वेदे in the Veda च and पुरुषोत्तमः Purushottama (the Highest Purusha) इति as प्रथितः celebrated अस्मि am I.

18. As I transcend the Perishable and am above even the Imperishable, therefore am I in the world and in the Veda celebrated as Purushottama, (the Highest Purusha).

[*The Perishable:* The Tree of Samsāra called Ashvattha.

The Imperishable: Which constitutes the seed of the Tree of Samsāra.]

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।।
स सर्वविद्भजति मां सर्वभावेन भारत ।।१९।।

भारत O descendant of Bharata यः who एवम् thus असम्मूढः free from delusion पुरुषोत्तमम् the Supreme Purusha माम् Me जानाति knows सः he सर्ववित् knowing all सर्वभावेन with all his heart मां Me भजति worships.

19. He who, free from delusion, thus knows Me, the Highest Spirit, he knowing all, worships Me with all his heart, O descendant of Bharata.

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ।।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत।।२०।।

अनघ O sinless one भारत O descendant of Bharata इति thus गुह्यतमं most profound इदम् this शास्त्रम् teaching मया by Me उक्तं has been imparted एतत् this बुद्ध्वा knowing बुद्धिमान् possessed of (the highest) intelligence कृतकृत्यः (who has) accomplished all the duties च and स्यात् becomes.

20. Thus, O sinless one, has this most profound teaching been imparted by Me.

Knowing this one attains the highest intelligence and will have accomplished all one's duties, O descendant of Bharata.

[*Highest intelligence:* which realises the Brahman.

Will have accomplished...duties: Whatever duty one has to do in life, all that duty has been done, when the Brahman is realised.]

इति पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ।।

The end of the fifteenth chapter, designated, *The Way to the Supreme Spirit.*

॥ षोडशोऽध्यायः ॥

SIXTEENTH CHAPTER

श्रीभगवानुवाच ।

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ॥
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१॥

श्रीभगवान् The Blessed Lord उवाच said:

अभयं Fearlessness सत्त्वसंशुद्धिः purity of heart ज्ञानयोगव्यवस्थितिः steadfastness in knowledge and Yoga दानं almsgiving दमः control of the senses यज्ञः Yajna स्वाध्यायः reading of the Shāstras तपः austerity आर्जवम् uprightness;

The Blessed Lord said:.

1. Fearlessness, purity of heart, steadfastness in knowledge and Yoga; almsgiving, control of the senses, Yajna, reading of the Shāstras, austerity, uprightness;

[*Yoga:* consists in making what has been learnt from the Shāstras and the Āchārya an object of one's own direct perception, by concentration and self-control.]

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ॥
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥२॥

अहिंसा Non-injury **सत्यम्** truth **अक्रोधः** absence of anger **त्यागः** renunciation **शान्तिः** tranquillity **अपैशुनम्** absence of calumny **भूतेषु** to beings **दया** compassion **अलोलुप्त्वं** uncovetousness **मार्दवं** gentleness **ह्रीः** modesty **अचापलम्** absence of fickleness;

2. Non-injury, truth, absence of anger, renunciation, tranquillity, absence of calumny, compassion to beings, uncovetousness, gentleness, modesty, absence of fickleness;

[*Uncovetousness:* Unaffectedness of the senses when in contact with their objects.

Absence of fickleness: Avoidance of useless actions.—*Shridhara.*]

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ।।३।।

तेजः Boldness **क्षमा** forgiveness **धृतिः** fortitude **शौचम्** purity **अद्रोहः** absence of hatred **नातिमानिता** absence of pride **दैवीम्** divine **सम्पदं** state **अभिजातस्य** to one born for **भवन्ति** (these) belong **भारत** O descendant of Bharata.

3. Boldness, forgiveness, fortitude, purity, absence of hatred, absence of pride; these belong to one born for a divine state, O descendant of Bharata.

दम्भो दर्पोऽभिमानश्च क्रोधः पा ण्यमव च ।।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ।।४।।

पार्थ O Pārtha दम्भः ostentation दर्पः arrogance च and अभिमानः self-conceit क्रोधः anger पारुष्यम् harshness च and अज्ञानं ignorance च एव as well as आसुरीम् an Āsurika सम्पदम् state अभिजातस्य to one who is born for.

4. Ostentation, arrogance, and self-conceit, anger as also harshness and ignorance, belong to one who is born, O Pārtha, for an Āsurika state.

[*Āsurika:* Demoniac.]

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ।।५।।

दैवी The divine सम्पत् state विमोक्षाय for liberation आसुरी the Āsurika निबन्धाय for bondage मता is deemed (as mature) पाण्डव O Pāndava मा not शुचः grieve दैवीम् the divine सम्पदं state अभिजातः born for असि (thou) art.

5. The divine state is deemed to make for liberation, the Āsurika for bondage; grieve not, O Pāndava, thou art born for a divine state.

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ।।६।।

पार्थ O Pārtha अस्मिन् लोके in this world दैवः the divine आसुरः the Āsurika च and द्वौ two भूतसर्गौ types of beings दैवः the divine विस्तरशः at length प्रोक्तः has been described आसुरं of the Āsurika मे from Me शृणु hear.

6. There are two types of beings in this world, the divine and the Āsurika. The divine have been described at length; hear from Me, O Pārtha, of the Āsurika.

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ।।७।।

आसुराः The Āsurika जनाः persons प्रवृत्तिं what to do च and निवृत्तिं what to refrain from न not विदुः know तेषु in them न neither शौचं purity न nor आचारः good conduct न च nor सत्यं truth विद्यते is.

7. The persons of Āsurika nature know not what to do and what to refrain from; neither is purity found in them nor good conduct, nor truth.

[*What to do . . . from:* What acts they should perform to achieve the end of man, nor what acts they should abstain from to avert evil.]

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ।।८।।

जगत् The universe असत्यम् (is) without truth अप्रतिष्ठं without (moral) basis अनीश्वरम् without a God अपरस्परसम्भूतं brought about by mutual union किमन्यत् what else कामहैतुकम् with lust for its cause ते आहुः they say.

8. They say, "The universe is without truth, without a (moral) basis, without a God, brought about by mutual union, with lust for its cause; what else?"

[*Without truth:* As we are unreal so this universe is unreal, and the sacred scriptures that declare the truth are unreal.

What else: but lust can be the cause of the universe?—This is the view of the Lokāyatikas, the materialists.]

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ।।९।।

अल्पबुद्धयः Of small intellect एतां this दृष्टिम् view अवष्टभ्य holding नष्टात्मानः ruined souls उग्रकर्माणः of fierce deeds अहिताः the enemies जगतः of the world क्षयाय for (its) destruction प्रभवन्ति rise.

9. Holding this view, these ruined souls of small intellect and fierce deeds, rise as the enemies of the world for its destruction.

[*Small intellect:* as it concerns itself only with sense-objects and cannot soar higher.]

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।।
मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः।।१०।।

दुष्पूरं Insatiable कामम् desire आश्रित्य abiding in दम्भमान-मदान्विताः full of hypocrisy, pride, and arrogance मोहात् through delusion असद्ग्राहान् evil ideas गृहीत्वा holding अशुचिव्रताः with impure resolve प्रवर्तन्ते they work.

10. Filled with insatiable desires, full of hypocrisy, pride, and arrogance, holding evil ideas through delusion, they work with impure resolve.

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।।
कामोपभोगपरमा एतावदिति निश्चिताः ।।११।।

प्रलयान्ताम् Ending only with death अपरिमेयां immense चिन्ताम् cares उपाश्रिताः beset with कामोपभोगपरमाः regarding gratification of lust as the highest एतावत् that is all इति that निश्चिताः feeling sure;

11. Beset with immense cares ending only with death, regarding gratification of lust as the highest, and feeling sure that that is all;

[*Cares:* as to the means of acquiring and preserving the innumerable objects of desire.]

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ।।१२।।

आशापाशशतैः By a hundred ties of hope बद्धाः bound कामक्रोधपरायणाः given over to lust and wrath कामभोगार्थम् for sensual enjoyment अन्यायेन by unjust means अर्थसञ्चयान् hoards of wealth ईहन्ते (they) strive (to secure).

12. Bound by a hundred ties of hope, given over to lust and wrath, they strive to secure by unjust means hoards of wealth for sensual enjoyment.

इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।।१३।।

अद्य Today मया by me इदम् this लब्धम् has been gained इदं this मनोरथम् desire प्राप्स्ये I shall obtain इदम् this अस्ति is पुनः again (in future) मे mine इदम् this अपि also धनम् wealth भविष्यति shall be.

13. "This today has been gained by me; this desire I shall obtain; this is mine, and this wealth also shall be mine in future.

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ।।१४।।

असौ That शत्रुः enemy मया by me हतः has been slain अपरान् others च and अपि also हनिष्ये shall I slay अहम् I ईश्वरः Lord अहं I भोगी enjoyer अहं I सिद्धः (am) successful बलवान् powerful सुखी happy.

14. "That enemy has been slain by me, and others also shall I slay. I am the Lord,

I enjoy, I am successful, powerful, and happy.

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः।।१५।।

आढ्यः Rich अभिजनवान् well-born अस्मि I am मया to me सदृशः equal अन्यः else कः who अस्ति is यक्ष्ये I will sacrifice दास्यामि I will give मोदिष्ये I will rejoice इति thus अज्ञानविमोहिताः deluded by ignorance,

15. "I am rich and well-born. Who else is equal to me? I will sacrifice, I will give, I will rejoice." Thus deluded by ignorance,

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ।।१६।।

अनेकचित्तविभ्रान्ताः Bewildered by many a fancy मोह-जालसमावृताः covered by the meshes of delusion कामभोगेषु to the gratification of lust प्रसक्ताः addicted अशुचौ foul नरके into a hell पतन्ति they fall.

16. Bewildered by many a fancy, covered by the meshes of delusion, addicted to the gratification of lust, they fall down into a foul hell.

आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ।।१७।।

आत्मसम्भाविताः Self-conceited स्तब्धाः haughty धनमान-मदान्विताः filled with the pride and intoxication of wealth ते they दम्भेन out of ostentation नामयज्ञैः sacrifices in name अविधिपूर्वकम् disregarding ordinance यजन्ते they perform;

17. Self-conceited, haughty, filled with the pride and intoxication of wealth, they perform sacrifices in name, out of ostentation, disregarding ordinance;

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।।१८।।

अहङ्कारं Egoism बलं power दर्पं insolence कामं lust क्रोधं wrath च and संश्रिताः possessed of आत्मपरदेहेषु in their own bodies and in those of others माम् Me (the Self within) प्रद्विषन्तः hating अभ्यसूयकाः (these) malignant people.

18. Possessed of egoism, power, insolence, lust, and wrath, these malignant people hate Me (the Self within) in their own bodies and those of others.

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।।१९।।

अहं I द्विषतः malicious क्रूरान् cruel नराधमान् most degraded of men अशुभान् evil-doers संसारेषु in these

worlds आसुरीषु of Asuras योनिषु into the wombs एव only अजस्रम् perpetually क्षिपामि (I) hurl.

19. These malicious and cruel evil-doers, most degraded of men, I hurl perpetually into the wombs of Asuras only, in these worlds.

[*Wombs of Asuras:* Wombs of the most cruel beings, as tigers, snakes, etc.

Worlds: Paths of Samsāra passing through many a hell.]

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्।।२०।।

कौन्तेय O son of Kunti मूढा: deluded जन्मनि जन्मनि birth after birth आसुरीं Āsurika योनिम् wombs आपन्ना: obtaining माम् Me अप्राप्य not attaining एव still तत: than that अधमां lower गतिम् condition यान्ति (they) fall into.

20. Obtaining the Āsurika wombs, and deluded birth after birth, not attaining to Me, they thus fall, O son of Kunti, into a still lower condition.

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।।२१।।

काम: Lust क्रोध: anger तथा and लोभ: greed इदं this त्रिविधं triple नरकस्य of hell द्वारं the gate आत्मन: of the self नाशनम् destructive एतत् these त्रयं three त्यजेत् (one) should forsake.

21. Triple is this gate of hell, destructive of the self—lust, anger and greed; therefore one should forsake these three.

[*Destructive of the self:* making the self fit for no human end whatever.]

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्।।२२।।

कौन्तेय O son of Kunti एतैः from these त्रिभिः three तमोद्वारैः gates of darkness (hell) विमुक्तः free नरः the man आत्मनः for himself श्रेयः what is good आचरति practises ततः and then परां Supreme गतिम् Goal याति goes to.

22. The man who has got beyond these three gates of darkness, O son of Kunti, practises what is good for himself, and thus goes to the Goal Supreme.

[*Gates of darkness:* leading to hell (Naraka) which is full of pain and delusion.]

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।।२३।।

यः Who शास्त्रविधिम् the ordinance of the Shāstra उत्सृज्य setting aside कामकारतः under the impulse of desire वर्तते acts सः he सिद्धिम् perfection न not अवाप्नोति attains to न nor सुखं happiness न nor परां Supreme गतिम् Goal.

23. He who, setting aside the ordinance of the Shāstra, acts under the impulse of desire, attains not to perfection, nor happiness, nor the Goal Supreme.

[*Perfection:* fitness for attaining the end of man.]

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ।।२४।।

तस्मात् So कार्याकार्यव्यवस्थितौ in ascertaining what ought to be done and what ought not to be done शास्त्रं the Shāstra ते thy प्रमाणं (be) authority इह here शास्त्रविधानोक्तं what is said in the ordinance of the Shāstra ज्ञात्वा having known कर्म action कर्तुम् to do अर्हसि thou shouldst.

24. So let the Shāstra be thy authority in ascertaining what ought to be done and what ought not to be done. Having known what is said in the ordinance of the Shāstra, thou shouldst act here.

[*Here:* in this world.]

इति दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः।।

The end of the sixteenth chapter, designated, *The Classification of the Divine and the Non-divine Attributes.*

॥ सप्तदशोऽध्यायः ॥

SEVENTEENTH CHAPTER

अर्जुन उवाच ।

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ॥
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः
॥१॥

अर्जुनः Arjuna उवाच said:

कृष्ण O Krishna ये who शास्त्रविधिम् the ordinance of the Shāstra उत्सृज्य setting aside श्रद्धया with Shraddhā तु but अन्विताः endued यजन्ते perform sacrifice तेषां their निष्ठा condition का what सत्त्वम् Sattva रजः Rajas अहो or तमः Tamas.

Arjuna said:

1. Those who, setting aside the ordinance of the Shāstra, perform sacrifice with Shraddhā, what is their condition, O Krishna? (Is it) Sattva, Rajas, or Tamas?

[*Setting...Shraddhā:* not that they believe the ordinance of the Shāstra to be false, but out of laziness or because of the difficulty in adhering to them strictly,

they let them alone and worship the gods, endued with Shraddhā.]

श्रीभगवानुवाच ।
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु।।२।।

श्रीभगवान् The Blessed Lord उवाच said:

देहिनां Of the embodied सात्त्विकी the Sāttvika राजसी the Rājasika तामसी Tāmasika च and इति thus त्रिविधा threefold एव indeed श्रद्धा the Shraddhā भवति is सा which स्वभावजा (is) inherent in (their) nature तां of it शृणु hear (thou).

The Blessed Lord said:

2. Threefold is the Shraddhā of the embodied, which is inherent in their nature—the Sāttvika, the Rājasika and the Tāmasika. Do thou hear of it.

[*Inherent . . . nature:* born of their past Samskāras. *It:* the threefold Shraddhā.]

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ।।३।।

भारत O descendant of Bharata सर्वस्य of each श्रद्धा Shraddhā सत्त्वानुरूपा according to his natural disposition भवति is अयं the पुरुषः man श्रद्धामयः consists of

(his) Shraddhā य: he यच्छ्रद्ध: what (his) Shraddhā is स: he एव verily स: that (is).

3. The Shraddhā of each is according to his natural disposition, O descendant of Bharata. The man consists of his Shraddhā; he verily is what his Shraddhā is.

[*Natural disposition:* the specific tendencies or Samskāras.]

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः ।।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ।।४।।

सात्त्विका: Sāttvika men देवान् the Devas यजन्ते worship राजसा: the Rājasika यक्षरक्षांसि the Yakshas and the Rākshasas अन्ये the others तामसा: the Tāmasika जना: men प्रेतान् the Pretas भूतगणान् the hosts of Bhutas च and यजन्ते worship.

4. Sāttvika men worship the Devas; Rājasika, the Yakshas and the Rākshasas; the others—the Tāmasika men—the Pretas and the hosts of Bhutas.

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ।।५।।
कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ।।६।।

दम्भाहङ्कारसंयुक्ताः Given to ostentation and egoism **कामरागबलान्विताः** endowed with the power of lust and attachment **ये** who **अचेतसः** senseless **जनाः** men **शरीरस्थं** in the body **भूतग्रामम्** all the organs **अन्तःशरीरस्थं** that dwell in the body within **मां** Me **च** and **कर्शयन्तः** torturing **अशास्त्रविहितं** not enjoined by the Shāstras **घोरं** severe **तपः** austerity **तप्यन्ते** practise **तान्** them **आसुरनिश्चयान्** to be of Āsurika resolve **विद्धि** know.

5-6. Those men who practise severe austerities not enjoined by the Shāstras, given to ostentation and egoism, endowed with the power of lust and attachment, torture, senseless as they are, all the organs in the body, and Me dwelling in the body within; know them to be of Āsurika resolve.

[*Austerities:* which cause pain to himself and to other living beings.

Possessed. . .attachment: may also be interpreted as, "possessed of lust, attachment and power".

All the organs of the body: the aggregate of all the elements composing the body.]

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ।।७।।

सर्वस्य By each of them **अपि** also **आहारः** food **तु** indeed **त्रिविधः** threefold **प्रियः** liked **भवति** is **तथा** as also **यज्ञः** Yajna

तपः austerity दानं almsgiving च and तेषां their इमं this भेदम् distinction शृणु do thou hear.

7. The food also which is liked by each of them is threefold, as also Yajna, austerity, and almsgiving. Do thou hear this, their distinction.

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः
सात्त्विकप्रियाः ।।८।।

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः Those which augment आयुः vitality सत्त्वम् energy बलम् strength आरोग्यम् health सुखम् cheerfulness and प्रीतिः appetite रस्याः which are savoury स्निग्धाः oleaginous स्थिराः substantial हृद्याः agreeable आहाराः the foods सात्त्विकप्रियाः (are) liked by the Sāttvika.

